॥मयोध्या

Ram Charit Manas

॥ बाल कां॰ ३ ।
॥ अयोध्या कां॰ २ ।
॥ आरंण्य कां॰ ३ ।
॥ लंका कां॰ ३ ।
॥ सुंदर कां॰ ३ ।
॥ उत्तर कां॰ ३ ।

22

...ल
...तमिव
...गुणैर्द्वसमो
...समो न विद्यते वा
...ः ह्यातज्ञो विजितेंद्रियः
...तः बुद्धुस्तातानां हृद्यानां
...देहयष्टिहेगजेरथेऽलब्ध ६
...व्यमानुषसंस्थेषु सर्वास्त्रेषु
...जत्वोपनिवर्ततेसदाग्नेनगरा

दः यव

॥अयोध्या

॥ ६० ॥ श्रीगणेशाय नमः ॥ श्रीरामचंद्राय नमः ॥ जयति रघुवंशतिल
दननिधनकारी दासरथिः पुंडरीकाक्ष १ कस्यचित्त्वथ कालस्य रा
दं बचनमब्रवीत् ॥ अयं कैकयराजस्य पुत्रो वसति पुत्रक ॥ त्वां नेतुमागतो
दशरथस्यैतद्भरतः कैकयीसुतः ॥ गमनेथ मतिं चक्रे शत्रुघ्नसहितस्तदा ॥
त्मजं भरतं चाभ्यनुज्ञाते राजा राजीवलोचने प्रहृष्टा तत्र कैकेयी मुदा परम
रतस्य महात्मनः ॥ गमनेव मतिं चक्रे तदा तस्य सुमानना ॥ गृहे मातामहकुले सैन्य
हृष्टो भमेतस्मिन्वापीह वा गृहे सत्वरं ह्यनुज्ञायन्नृपः सुतं सुरसुतोपमं संमान
गृहं प्रति ॥ आपृच्छ्य पितरं सोथ रामं चाक्लिष्टकारिणं मातॄंश्चैव महाबाहुः शत्रुघ्नसहितोय
गजैर्मे रथैश्चैव पत्तिवाजिभिः पादातेन च मुख्येन हृष्टः शतसहस्रशः सपित्रा समनुज्ञातः परिषत्
भरतः सिंहविक्रांतः शत्रुघ्नश्च महामतिः तं तदा प्रस्थितं वीरं भरतं वदतां वरः राजा दशरथो वाक्यमुप
जनमे सदा प्रस्थितस्तेन नरवर मातामहकुलेस्तु ते संदेशं मे एवमेव स्मृते च कुर्याः समाहितः शत्रुघ्नसहि

॥अयोध्या

तांन्नवद्भिरपितःसर्वमनुवर्त्तव्यमद्यमे॥अनुजातोहिमेसर्वैर्गुणैर्ज्येष्ठोममात्मजः।पुरंदरसमोवीर्येरामःपरपु
रंजयः।तंचंद्रमसिपुष्येणयुक्तोधर्मभृतांवरं।यौवराज्येनिषेक्तास्मिप्रातःक्षत्रियपुंगवं॥अनुरूपोहिराज्यस्य
लक्ष्मीवांलक्ष्मणाग्रजः।त्रैलोक्यमपिनाथेनयेनस्यान्नाथवत्तरं।संयोऽयरामंराज्येतच्छ्रेयसाहंमहीपतिं।सं
स्मित्यरामस्यत्तेजोविहतोस्मिन्गतज्वरः।इतिब्रुवाणंमुदिताःसर्वेचैवंनृपंनराः।वृष्टिमंतइवांभोदंगर्जंतमिवब
र्हिणः।तस्यतद्वचनंश्रुत्वासर्वकल्पस्यधीमतः।प्रियंचैवानुरूपंचवक्तुंसमुपचक्रमुः।दिव्यैर्गुणैर्दक्षसमो
बलः।इक्ष्वाकुभ्योहिसर्वेभ्योव्यतिरिक्तोविशांपते।रामःसत्पुरुषोलोकेसत्यधर्मयशोगुणैः।समोनविद्यतेवा
स्त्रिहिशिष्टःकुतएवनु।धर्मात्मासत्यवादीचशीलवाननसूयकः।दांतःसत्वहितःप्राज्ञःकृतज्ञोविजितेंद्रियः।
मृदुश्चस्थिरबुद्धिश्चनित्यंदीनानुकंपकः।प्रियवादीजितक्रोधोदीर्घदर्शीमहामतिः।बहुश्रुतानांवृद्धानां
ब्राह्मणानामुपासिता।तेनतस्यातुलाकीर्तिर्यशस्तेजश्चवर्द्धते।समाप्तश्चधनुर्वेदेहयपृष्ठेगजेरथे।लब्ध
लक्षःशब्दवेधीचदूरपातीदृढायुधः।देवासुरमनुष्याणांसंयुगेष्वपराजितः।दिव्यमानुषसंस्थेषुसर्वास्त्रेषु ६
विशारदः।यंचोपयातिसंग्रामेग्रामंतेनगरेपिवा।गत्वासौमित्रिणासार्द्धंविजित्योपनिवर्त्तते।सदागतेनगरा

तद्राजवेश्ममनुजैर्यथावत्प्रतिपूरितं।ददर्शभीममनिर्ह्रादंवायोध्वैरिवसागरं।तंजनौघैर्बहुविधैराजभिःसम
लंकृतं।ददर्शद्युतिमान्राजाप्रजापतिरिवापरः॥मध्यराज्ञाविनीर्णेषुआसनेषुसमंततः।राजानमेवाभिमुखा
निषेदुर्नियताजनाः।तेषांमध्येमहातेजादेवानामिववासवः।शुशुभेसर्वसिद्धार्थःसर्वाभरणभूषितः।तेनतं
समहात्मानंपूर्णचंद्रसमद्युतिं।उपासांचक्रिरेवीराःकुबेरमिवनैर्ऋताः॥सलब्धमानैर्विनयप्रशमागतैःपुराल
येजानपदैःसमागतैः।सुखोपविष्टैश्चनरेन्द्रपोवभौसहस्रचक्षुर्भगवानिवामरैः॥इत्यार्षेरामायणेऽयोध्या
कांडेप्रकृतिसमागमोनामसर्गः॥ततःपरिषदंसर्वामामंत्र्यवसुधाधिपः।हितमुद्धर्षणंचेदमुवाचाप्रतिमं
वचः।दुंदुभिःस्वरकल्पेनगंभीरेणानुनादिना।स्वनेनभगवान्राजाजीमूतइवनादयन्।इदमिक्ष्वाकुभिःस
र्वैर्नरेंद्रैःपरिपालितं।श्रेयसायोक्तुमिच्छामिसुखार्थमखिलंजगत्॥मयोध्याचरितंपूर्वैःपंथानमनुगच्छता।प्रजा
विनीतखेदेनयथाशक्त्याभिरक्षिता।इदंशरीरंकृत्स्नस्यसुखस्यविषयेचिरं।पांडुरस्यातपत्रस्यछायायांधारि
तंमया।प्राप्यवर्षसहस्राणिबहून्यायुश्चपालितम्।जीर्णस्यास्यशरीरस्यविश्राममभिरोचये।राजपुंगवदुष्ट
हिदुर्वहामजितेंद्रियैः।परिश्रांतश्चलोकेस्मिन्गुर्वीमद्यधारंवहन्।सोहंविश्राममिच्छामिहात्वासर्वप्रजाहि

॥अयोध्या

यौवराज्याय रामस्य सर्वमेवोपकल्प्यतां श्वोभूते पुष्ययोगेन कृतयोग्यद्विरोचते ॥ अप्यथावन्तराः सर्वे पूर्वमेव
नराधिपं रामोवाग्निमर्मनोन्तिश्च ॥ अभिषिक्तो हि नागरैः तेषां तद्वचनं श्रुत्वा पौराणां तत्र हर्षजः सर्वे सौमन्त्र
हांछहृः साधुसाक्षितिज ल्प्यतां प्रानै स्तस्मिन्प्रशांते षु तु जनघोषेन नराधिपः प्रणम्य गुरुमासीनमित्युवाच पु
रोहितं ॥ अभिषेकाय रामस्य यत्कर्म्म सपरिच्छदं तदस्य भगवन्सर्वमाज्ञापयितुमर्हसि तच्छ्रुत्वा भूमिपाल
स्य वसिष्ठो द्विजसत्तमः ॥ आदिदेशाग्रतो राज्ञो गुणेयुक्तं कृतांजलिं स्वर्णादीनि रत्नानि वलिं सर्वौषधीति
च सितवर्णौ चतुरगाजं च प्रमुलक्षणं चामरव्यंजने चैते ध्वजे छत्रं च पांडुरं शतं च शातकौंभानां कुंभानाम
निवर्चसां हिरण्यशृंगं वृषभं समग्रं व्याघ्रचर्मच यच्चान्यत्किंचिदेष्टव्यं तच्च सर्वमनूनकं उपस्थापयत प्राग्वे
रम्न्यागारं महीपतेः ॥ अंतःपुरस्य द्वाराणि सर्वस्य नगरस्य च चंदनस्रग्भिरर्च्यंतां सुमनोदामभिस्तथा सर्वं
प्रशस्तं गुणवद्दधिक्षीरोपसेचनं द्विजानां शतसाहस्रं यत्र कामफलं लभेत सिद्धमन्नादिकं तावत्प्रत्यूषसे
वकल्प्यतां सूर्येऽभ्युदितमात्रे श्वोभाविनि स्वस्तिवाचनं निमंत्र्यतां ब्राह्मणाश्च कल्पंतामासनानि च ॥ आज्ञा ७
प्यंतां पताकाश्च राजमार्गश्च सिच्यतां सर्वे च नागराश्चैव गणिकाश्च स्वलंकृताः कक्ष्यां द्वितीयामासाद्य तिष्ठं

गच्छन्कुंजरेणरथेनवा।।राजमार्गेगतोदृष्ट्वाकुशलंपरिपृच्छति।पुत्रेष्वग्निषुदारेषुप्रेष्यशिष्यगणेषुच।।निखि
लेनानुपूर्व्येणपितापुत्रानिवौरसान्।शुश्रूषंतिवचःशिष्याःकच्चित्कर्मसुदंशिता।।इतिनःपुरुषव्याघ्रःसदारा
मोनिनाथसे।व्यसनेषुचसर्वेषांत्र्यशंभवतिदुःखितः।श्रुत्वाचाप्युदयंकच्चित्पितेवपरितुष्यति।।वसंश्रेयसि
जातस्तेदिष्ट्यासौतवराघवः।दिष्ट्यारामोगुणैर्युक्तोमारीचइवकश्यपः।बलमारोग्यमायुश्चरामस्यविदितात्म
नः।आशंसंतेजनाःसर्वेराष्ट्रेषुनगरेषुच।आभ्यंतराश्चबाह्याश्चपौराजानपदाजनाः।स्त्रियोवृद्धास्तरुण्यश्च
सायंप्रातःसमाहिताः।सर्वान्देवान्नमस्यंतिरामस्यार्थेमहात्मनः।तेषांसयाचितंदेवत्वत्प्रसादात्समृध्यतां।
वीरमिंदीवरश्यामंसर्वशत्रुनिवर्हणं।पश्येमयौवराज्यस्थंरामंराजीवलोचनं।तंदेवदेवोपममात्मजंतेसर्वस्य
लोकस्यहितेनिविष्टं।मतीवतंक्षिप्रमुदारसत्वंपुरेभिषेक्तुंवरदार्हसित्वं।।इत्यार्षेरामायणेअयोध्याकांडेप्र
कृतिवाक्यंनामसर्गः।।तेषामंजलिमालास्ताःप्रतिगृह्यविशांपतिः।संप्रविष्टोब्रवीत्पौरास्तान्प्रियंहितं
वचः।अत्रास्मिन्परमप्रीतोलाभश्चानुत्तमोमम।जन्मज्येष्ठंप्रियंपुत्रंयौवराज्येयदीच्छथ।इत्यर्चितान्सर्वान्
ब्राह्मणानिदमब्रवीत्।वसिष्ठंवामदेवंचतेषामेवोपशृण्वतां।चैत्रःश्रीमानयंमासःपुण्यःपुष्पितकाननः।

अयोध्या तिमां राजा प्रजापतिरिवापरः। राजा वभूव संहृष्टो दृष्ट्वायांतं तमात्मजं। अवतार्य सुमंत्रस्तं राघवं स्यंदनोत्तमात्
पितुः सकाशं गच्छंतं प्रांजलिः पृष्ठतो न्वगात्। ततः कैलाशसंकाशं प्रासादं तमरिंदमः आरुरोह तमासाद्य सह सू-
तेन राघवः। स प्रांजलिरभिक्रम्य किंचित्प्रह्वः समाहितः। नाम संकीर्तयन् रामो ववंदे चरणौ पितुः। तं पुत्रमिक्ष्वा-
कुवरस्तुनीतेजयवर्द्धने सह दृष्ट्वा प्रणतं प्रांशुं कृतांजलिपुटं नृपः। गृहीत्वांजलौ समाकृष्य सस्वजे प्रियमात्मजम्
प्रत्यनंदत्स धर्मात्मा स्वपुत्रं पर्षदागतः। तस्मै स्वरूपं रुचिरं कांचनं रत्नभूषितं राघवायासनं राजा प्रदिदेश म-
हात्मने। तदासनवरं प्राप्य दीपयामास राघवः स्वयैव प्रभया मेरुमुदये विपुलो रविः तेन विभ्राजमानेन
सा सभातिव्यराजत विमलग्रहनक्षत्रा शारदी द्यौरिवेंदुना प्रासादवर्यः सुशुभेन मोमानुमता यथा तमवेक्ष्य
संहर्षीदिक्ष्वाकुः प्रियमात्मजं आत्मानमिव चादर्शे युक्तरूपमिव श्रिया राज्यलक्षणसंपन्नं वृद्धो रक्षं महात्म-
जं राजपुत्रमुवाचेदं महेंद्रमिव कश्यपः ज्यादिष्टो ह्यसि मे ज्येष्ठः राम नामात्मजः प्रियः त्वया तात प्रजाश्चेमाः स्वगु-
णैरनुरंजिताः तस्मात्त्वं पुष्ययोगेन यौवराज्यमवाप्स्यसि जितेंद्रियः प्रकृत्यासि भूयस्तानि विशोकुरु कामक्रोध- ८
समुत्थं वै त्यक्तव्यं व्यसनं त्वया परोक्षया वर्तमानो वृत्त्या प्रत्यक्षया तथा अमात्यप्रमुखाः सर्वाः प्रकृतीरनुरंज

तुनरप्रवेशमति देवायतनचैत्येषु सान्नभक्ष्यप्रदक्षिणाः नरास्थापयितव्याश्च मालायोग्याः पृथक्पृथक् दीर्घा
सिबद्धायोधाश्च सर्वे सो मृष्टवाससः महाराजस्यचत्वरं प्रविशंतु महोदयं एवमाज्ञाप्य तत्सर्वं कृतमित्यभ्यवे
दयत् सुप्रीतमनसं राजा वसिष्ठं हर्षयत्पुनः ततः सुमंत्रं द्युतिमान् राजा वचनमब्रवीत् रामः कृतात्मा भव
ताक्षिप्रमानीयतामिति समानयेनं धर्मज्ञं सुमंत्रप्रियदर्शनं रामं मममनो यावद्भ्रमतः प्रेक्षते सुते स तथेति
प्रतिज्ञाय सुमंत्रो राजशासनं रामं तत्रानयामास रथेन रथिनां वरं प्रययौ रथमादाय ततस्ता रथिनां वरं आ
सीनं चैव राजानमिक्ष्वाकुराष्ट्रवर्द्धनं प्राच्योदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च भूमिपाः आर्याम्लेच्छाश्च सा
घ्याश्च पार्वतीयाश्च सर्वशः उपासांचक्रिरे वीरा कुवेरमिव नैऋताः तेषां मध्ये महाराजो देवानामिव वासवः
प्रासादस्थो रथस्थं तं ददर्शायांतमात्मजं विद्योतमानं प्रनयाददर्श सुमहामतिं गंधर्वराजप्रतिमं लोके विख्यात
पौरुषं दीर्घबाहुं समासत्वं मत्तमातंगगामिनं शैलकुंठितदंतानां गृहीतारं विषाणिनां एकं विख्यातवीर्याणां
गमयं सर्वधनुष्मतां सुवर्षेणेव पर्जन्यः ह्लादयंतं स्वप्रजाः गुणैर्विद्योतमानं च सहस्रांशुमिवांशुभिः चंद्रकांता
ननन्तरं हस्तिनामिव दंष्ट्रिणामिव सर्वेषां प्रधने युद्धकांक्षिणां नात्यप्यतततमायांतं पश्यमानो महीपतिः ददर्श

॰अयोध्या॰ नाप्रवेशयामासतदावचनंचेदमब्रवीत् किमागमनकार्यंतेतत्त्रवान्वक्तुमर्हसि तमुवाचततःसूतोराजा
त्वांद्रष्टुमिच्छति सूतस्यवचनंश्रुत्वारामोपित्वरयान्वितः प्रययौराजभवनंपुनर्द्रष्टुंनरेश्वरं श्रुत्वातुसमनु
प्राप्तंरामंदशरथोनृपः तूर्णंप्रवेशयामासविवक्षुरन्नयोहितं प्रविशन्नेवचश्रीमान्राघवोरघुनंदनः
ततोपितरंदृष्ट्वावस्त्रवाष्यकृतांजलिः ततःप्रणामंकुर्वाणंसंपरिष्वज्यभूमिपः ॰आदिदेशासनंतस्मैवाक्यंचे
दमुवाचह तातवृद्धोस्मिदीर्घायुर्व्रतानिचरितानिच सुसमृद्धैर्यथावेदंक्रतुभिश्चाप्तदक्षिणैः जातमिष्ट
मपत्यंचपालितंतदनंतरं ॰अनृणोस्मिपितृणांचदेवतानांचराघव नकिंचिदकृतंमेस्तितवान्यत्राभिषेचना
त् ॰अतोयथाहंतेब्रूयांतथात्वंकर्तुमर्हसि उपसृष्टंचमेरामनक्षत्रपीडितंग्रहैः ॰आवेदयंतिदैवज्ञाजन्मस्था
मेशनेश्वरः ॰अपिवाप्यनन्निप्रेतान्स्वप्नान्पश्यामिदारुणान् सनिर्घातामहोल्काश्चपतंतिखरनिस्वनाः
उपविष्टोविशारवास्त्रोहिण्योगतसतेग्रहः प्रवांतिवाताःपरुषाःसशैलाभूश्चकंपते प्रायेणहिनिमित्तानामी
दृशानांसमुद्भवे राज्याद्धानंस्पतेराजामृत्युंवाप्यधिगच्छति यावदेवममधर्मज्ञचेतोनपरिमुह्यते तावदेवा
भिगच्छस्वचलाहिप्राणिनांस्थितिः ॰अद्यचंद्रोभ्युपगतःस्वातिनाव्यक्तमुत्तरां तंहिवक्ष्यंतिविप्रेन्द्रदिवसंपुष्य ९

य। कोष्ठागारायुधागारे कृत्वा संपन्नयाधिके। तुष्टपुष्टजनताः पौर्याः पृथिवीमनुपालय। तव मित्राणि नंदंतु ल
ब्धामृतमिवामराः। इति राज्ञो वचः श्रुत्वा नराः प्रियनिवेदिनः। त्वरयाशीघ्रमभ्येत्य कौशल्यायै न्यवेदयत्। सा हिर
ण्यं च गाश्चैव रत्नानि विविधानि च। आदिदेश प्रियाख्येभ्यः कौशल्या प्रमदोत्तमा। रामोपि तद्वचः श्रुत्वा राज्ञो
मिततेजसः। प्रहृष्टवदनो भूत्वा तथेत्याह नराधिपं। रामोपि गुरुणाज्ञप्तः सोनुज्ञाप्य विसृज्यते। ययौ स्वं द्युतिमद्वे
श्म जनौघैरथसंवृतः। राममुद्दिश्य राजा वै गम्यतामित्यनोदयत्। अनुज्ञातस्ततः पित्रा वेगमनायोपचक्रमे। अथा
भिवाद्य राजानं रथमारुह्य राघवः। ययौ स्वं द्युतिमद्वेश्म जनौघैरथसंवृतः। ते चापि सर्वे समवाप्य कामं नरा
नरेंद्रेण कृतप्रहर्षाः। नरेंद्रमामंत्र्य गृहाणि सत्वराः प्रपेदिरे राघवराज्यहर्षिता।। इत्यार्षे रामायणे अयोध्या
कांडे दशरथानुज्ञासनो नाम सर्गः।। गतेष्वथ नृपो भूयः पौरेषु सह मंत्रिभिः। मंत्रयित्वा ततश्चक्रे निश्चयज्ञः स
निश्चयं। श्व एव पुष्यो भविता श्वोभिषेच्यः सुतो मया। रामो राजीवताम्राक्षो यौवराज्य इति श्रुतिः। रामे निवेदिते स
र्वे प्रणयाद्धर्षितेन च। अथांतर्गृहमासाद्य राजा दशरथस्तदा। सूतमाज्ञापयामास रामस्यानयनं पुनः। प्रतिगृ
ह्य तु तद्वाक्यं सूतः पुनरुपाययौ। रामस्य भवनं शीघ्रं तमेवानयितुं पुनः। द्वास्थैरावेदितं तत्र राघवाय महात्म